क्रियाद्वेषी नोपस्थाता निरुत्तरः । आहूतप्रपलायी च हीनः पञ्चविधः स्मृतः । अन्यवादी तथा हीनः स एव विकृताननः । पूर्ववादं परित्यज्य योऽन्यमालम्बते पुनः । वादसंक्रमणाज्ज्ञेयो हीनवादी स वै नरः” । कात्यायनेनापि “श्रावयित्वा यदा कार्यं त्यजेदन्यद्वदेदसौ । अन्यपक्षाश्रयस्तेन कृतो वादी स हीयते” ।यस्तु कञ्चिदभियुज्य नाहमेनमभियुञ्जे इत्येवं विरुद्धमभिदधीत सोऽप्यन्यवादी तथा हीन इत्याह स एव “न मयाभिहितं कार्यमभियुज्य परं वदेत् । विब्रुवंश्च भवेदेव हीनत्वमपि निर्दिशेत्”। तथा पत्रे लिखितं पूर्वपक्षमप्यन्यथा कुर्वन्नन्यवादी तथा हीन इत्याह स एव “लेखयित्वा तु यो वाक्यमूनं वाऽभ्यधिकं पुनः । वदेद्वादी स हीयेत नाभियोगन्तु सोऽर्हति” । अभियोगं पूर्वपक्षं नार्हति वादित्वयोग्यो न भवतीत्यर्थः । क्रियाद्वेषिणोऽनुपस्थातुश्च हीनतायास्तेनैव विवरणं कृतम् “लेख्यं च साक्षिणश्चैव क्रिया ज्ञेया मनीषिभिः । तां क्रियां द्वेष्टि यो मोहात् क्रियाद्वेषी स उच्यते । आह्वानादनुपस्थानात् सद्य एव स हीयते” । निरुत्तरतया हीनमप्याह स एव “ब्रूहीत्युक्तोऽपि न ब्रूयात् सद्यस्तद्दण्डमर्हति । द्वितीयेऽहनि दुर्बुद्धेर्विद्यात्तस्य पराजयम्” । पराजयं तच्चक्रं हीनताम् । अतएव हारीतः “सापदेशं हरेत्कालमब्रुवंश्चापि संसदि । उक्त्वा वचो विब्रुवंश्च हीयमानस्य लक्षणम्” । सापदेशं सव्याजम् । यथाह कात्यायनः “व्याजेनैव तु यत्रासौ दीर्घकालमतिक्रमेत् । सापदेशं तु तद्विद्याद्धानिकरं स्मृतमिति” । आहूतप्रपलायी अभियोगपरिहारार्थमाह्वानबुद्ध्या प्रच्छन्नचारी । एतेषामुत्तरोत्तरस्य हीनता गुर्वी न ज्ञापयितुं “हीनः पञ्चविध” इत्युक्तं न परिसंख्यार्थमन्येषामपि हीनत्वस्मरणात् । हीनतागुरुत्वज्ञापनं दण्डभूयस्त्वार्थम् । यथोक्तं कात्यायनेन “अन्यवादी पणान् पञ्च क्रियाद्वेषी पणान्दश । नोपस्थाता दश द्वे च षोडशैव निरुत्तरः । आहूतप्रपलायी च पणान्दाप्यस्तु विंशतिम्” । अत्रापि विशेष उक्तस्तेनैव “निराहूतमनायातमाहूतप्रपलायिनम् । पक्षत्रयात्यये तस्मान्न विनयेत्तं महीपतिः” कात्यायनेनैव प्रकारान्तरेणापि हीनः उक्तः ।“श्रावितव्यवहाराणामेकं यत्र प्रभेदयेत् । वादिनं लोभयेद्वैव हीनत्वमपि निर्दिशेत्” । श्रावितव्यवहाराणां सभ्यादीनां मध्ये एकमपि यः प्रभेदयेत् अयद्व्यवहारानुरोधाद्युत्पादनेनेत्यर्थः । बृहस्पतिरपि “भयं करोति भेदं वा भीषणं वा निरोधनम् । एतानि वादिनो यस्य व्यवहारे स हीयते” । भयादीनि व्यस्तसमस्तानि येन कृतानि स हीयत इत्यर्थः । भयं करोति भीषणामन्यमुखेन भयोत्पादनमिति शेषः । मनुरपि “अदेश्यं यश्च दिशति निर्दिश्यापह्नुते च यः । यश्चाधरोत्तरानर्थान् विगतान्नावबुध्यते । अपदिश्यापदेश्यञ्च पुनर्यस्त्वपधावति । सम्यक् प्रणिहितञ्चार्थं पृष्टः सन्नाभिनन्दति । असम्भाष्ये साक्षिभिश्च देशे सम्भाषते मिथः निरुच्यमानं प्रश्नञ्च नेच्छेद्यश्चापि निष्पतेत् । ब्रूहीत्युक्तश्च न ब्रूयात् उक्तञ्च न विभावयेत् । न च पूर्वापरं विद्यात्तस्मादर्थान् स हीयते । ज्ञातारः सन्ति मेत्युक्त्वा दिशेत्युक्तो दिशेन्न यः । धर्मस्थकारणैरेतैर्हीनत्वमपि निर्दिशेत्” । अदेश्यमनुपयोगासत्यत्वादिना निर्देशानर्हं दिशति कथयति यः । यश्च कथितमपि न मयेदमुक्तमित्यपलपति । यश्चाधरोत्तरानर्थान् पूर्वापराभिहितान्विगीतान्विरुद्धांस्तत्त्वेन नावबुध्यते । यश्चापदेश्यं व्याजं पीडादिकमपदिश्योक्त्वाव्यापद्यावति अपसरति सभातः । यश्च सम्यक् प्रणिहितं सम्यक् प्रणिधानेनाकलितमपि परोक्तमर्थं पृष्टः सन्नाभिनन्दति अनुवादप्रत्युत्तरदानादिना नाद्रियते । मेधातिथिस्त्वदेशमिति पठित्वा भाषावादिलिखितदेशभिन्नमसम्भाविपं वा देशम् । यद्वाऽभियोक्ता दिशेद्देशमित्यत्रेव देशशब्देन साक्षिणो व्याख्याय साक्षिनिर्देशः । अकाले सम्भावितसाक्षिणो निर्दिशती त” व्याचख्यौ । यश्च ज्ञातारः साक्षिणो ममोक्तेऽर्थे सन्तीति सभायामुक्त्वा के ते वदेत्युक्तो न वदेत्तान् । अत्र मा मां ज्ञातारः । यथार्थवाद्यहमिति जानानाः साक्षिण इति यावत् । द्वितीयैकवचनान्तस्यास्मच्छब्दस्य द्वितीयाया इत्यनेन माम् इत्यस्य मा इत्यादेशः । नतु मे इति षष्ठ्यन्तमेतत् । “सलर्थेत्वनाक्षिति”तन्निषेधात् । तेन मेति सन्धिरपि समाहित इति मेधातिथिः । आचार्यास्तु व्याकरणाधिकरणे सन्धिकरणमत्रापशब्द इति पूर्वपक्षप्रसङ्गेन वदन्तः षष्ठ्यन्ततामेवास्य मन्यन्ते मे सन्तीति सम्बन्धान्न तृतीयासम्बन्धप्रयुक्तषष्ठीप्रतिषेधावकाश इति तेषामभिसन्धिः । सन्ति ज्ञातार इत्युक्तीति कल्पतरुलिखितपाठस्तु रत्नाकर एवाचार्यमेधातिथिभ्यामदृतत्वादिति ध्येयम् । सिद्धान्ते त्वाचार्याणां छान्दसत्वमत्र समाधिरभिमतः । एतैः कारणैर्व्यस्तैः समस्तैर्वा वादिप्रतिवादिनोरन्यतरं हीनन्निर्दिशेदित्यर्थः । हीनवादितया दण्डार्हतामात्रन्न प्रकृ-